# श्रीहीरविजयसूरिकृता चतुरर्थी वीरस्तुतिः
# अज्ञातकर्तृकावचूरियुता

- सं. मुनि धुरन्धरविजय

**नोंध** : जगद्गुरु श्रीहीरविजयसूरिए रचेल एक-पद्यात्मक वीरस्तुति नी अज्ञातकर्तृक अवचूरि एक प्रकीर्ण पत्रमां प्राप्त छे. तेना आधारे आ मूळ पद्यनुं संकलन करेल छे. एक ज पद्यना चार अर्थ थाय ते विशिष्ट काव्यकौशल्य गणाय.

## वीरस्तुतिः

विज्ञानपारगत बालकवीरमान-
मातङ्गमुक्तममतागमदानतारि ! ॥
कामं तमोहरतरो परसत्पयोजे !
**सूरीशहीरविजयस्य** भव प्रसन्नः ॥ १ ॥

## अवचूरिः

श्रीभगवत्यै नमः

विज्ञान० व्याख्या ॥ विज्ञाः-निपुणाः, नाः-प्राणिनः, तान् पालयसि-रक्षसीति विज्ञानपालः (पारः) । र-लयोरैक्यत्वात् । तत्संबोधने ॥

तथा गता बाला-ब-वयो र-लयोरैक्यत्वात्-केशा विद्यन्ते यस्य स गत-बालो, व्रते गृहीते कचोत्पत्त्यभावत्वात् । स्वार्थे क प्रत्यये गतबालकः, तत्संबो०॥

तथा मानं-गर्वः, तदेव मातङ्गो-हस्ती, अत्युत्कटत्वात् । तेन मुक्तो वर्जितः।

तथा ममता-ममत्वं, तां गमयसि-निवारयसीति ममतागमः,तत्सं० ॥

तथा दं-वैराग्यं विद्यते यस्य स दस्तत्सं० ॥

तथाऽऽनता-प्रणता अरयो-वैरिणो विद्यन्ते यस्य स आनतारिः,तत्सं०॥

तथा तमोऽज्ञानं अतिशयेन हरसीति तमोहरतरः तत्सं० ॥

न विद्यन्ते परे-वैरिणो यस्य सोऽपरः, तत्सं० ॥

तथा सत्-विद्यमानं पयोजं-कमलं विद्यते यत्र स सत्पयोजः, तत्सं०॥ हस्तपादादिषु कमलाद्याकारत्वात् ।

तथा ईः-लक्ष्मीः, तां सूते इति ईसूः, तत्सं० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा हे ईश - स्वामिन् ! ॥ [हि-निश्चितं,]

तथा ई लक्ष्मीं, रासीति ईरः, तत्सं० ॥

तथा नास्ति भवः-संसारो यस्य स अभवः, तत्सं० ॥

एवंविध हे वीर ! हे वर्द्धमान ! त्वं हि-निश्चितं, कामं-अभिलाषः तत् । जयसि-विजयसे इति क्रियाकारकसम्बन्धः । कथंभूतं कामं ?। वः कलहो विद्यते यत्र तद्विकलहकर्तृत्वात् (?)। कथंभूतस्त्वं !, प्रसन्नः शुभ इति वीरस्तुतिः ॥ १ ॥ प्रथमोऽर्थः ॥

वि० व्याख्या ॥ विशिष्टं ज्ञानं विद्यते यस्य स विज्ञानः, तत्सं०॥

तथा कं सुखं विद्यते यस्य स कः, तत्सं०॥

तथा हे वीर ! शूर !, तथा मानो गर्वस्तद्रूपो यो मतङ्गः-नीचस्वभावात् चाण्ड(ण्डा)लः तेन मुक्तो वर्जितः, तत्सं० ॥

तथा ता-लक्ष्मीः - रलयोरैक्यत्वात् - तस्य आगमो-आगमनं विद्यते यस्य स तागमः, तत्सं० ॥

तथा दानं-उत्सर्गः, तस्य ता - लक्ष्मीः, तस्या आलिः-श्रेणिर्विद्यते यस्य स दानतालिः, तत्सं० ॥

तथा विजयो-जयः, तस्य तरुः (वृक्ष), तत्सं० ॥

तथा हे पर !-हे सर्वोत्कृष्ट ! ॥

तथा सतामुत्तमानां पासि-रक्षसीति सत्पः, तत्सं० ॥

तथा आः - ब्रह्मा-विष्णु-महेशाः, तेषां जिर्जेता अजिः, तत्सं०॥

तथा सूरयः -पण्डिताः, तेषां ईशाः -स्वामिनः, तेषु मध्ये हीर इव हीरः सूरीशहीरः, तत्सं० ॥

तथा भवं-श्रेयः प्रासि-पूरयसीति भवप्रः, तत्सं० ॥

तथा हे सन् ! -उत्तम !, एवंविध हे पारगतवार ! - तीर्थंकरसमूह !, त्वं काममत्यर्थं मम-मे, तमोऽज्ञानं, हर-निवारय, इति क्रियाकारकसम्बन्धः ॥

कथंभूतः सः या-लक्ष्मीर्विद्यते यस्य स यः, तत्सं०॥ पुनर्नः ज्ञानं विद्यते यस्य स नः, तत्सं० ॥

इति सर्वतीर्थंकरसाधारणस्तुतिः ॥ २ ॥ द्वितीयोऽर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्ञान० व्याख्या ॥ विज्ञानं-कला, तस्य पारो विद्यते यस्मात् स विज्ञानपारः तत्सं० ॥

तथा गतः वः - कलहो विद्यते यस्य स गतवः, तत्सं० ॥

तथा नास्ति रः - कामो येषां ते अराः, एवंविधा ये कवयः - कवितारः, तेषां ईं-लक्ष्मीं रासि-ददासीति अरकवीरः, तत्सं० ॥

तथा मां-लक्ष्मीं नयसि -प्रापयसीति मानः, तत्सं० ॥

दानं-क्षयः तद्रूपो यो(यः) तालो वृक्षविशेषः-रलयोरैक्यत्वात्-तस्मि-[न्] मतङ्गो-हस्ती। यथा हस्ती वृक्षमुन्मूलयति तथा त्वमपि क्षयं निवारयसि, तत्सं० ॥

तथा मुक्ता मा-लक्ष्मीः यैस्ते मुक्तमाः - साधवः, तेषां मत-इष्टः मुक्तमम-तः, तत्सं० ॥

तथा तः-युद्धं, मोहो-मौढ्यं, रतं-मैथुनं, तेषां लोपो नाशः-रलयोरैक्य-त्वात्-, तं रासि-ददासीति तमोहरतलोपरः, तत्सं० ॥

तथा सन्-विद्वान्, तद्रूपं यत् पयोजं-कमलं तत्र सूरिस्तरणिः, एवंविधः सन् ईशः-स्वामी सत्पयोजे सूरीशः, तत्सं० ॥

तथा इः-कामः, तं ईरयन्ति-प्रेरयन्तीति ईराः, तेषां विजयो विद्यते यस्मात् स ईरविजयः, तत्सं० ॥

तथा भवं श्रेयो विद्यते यस्य स भवः, तत्सं० ॥

तथा प्र-प्रकर्षेण सन्-विद्यमानः प्रसन्, तत्सं० ॥

एवंविध हे आगम ! हे सिद्धान्त ! त्वं नोऽस्माकं कामं-कन्दर्पं हि निश्चितं स्य-छेदय, इति क्रियाकारकसम्बन्धः ।

इति सिद्धान्तस्तुतिः ॥ ३ ॥ तृतीयोऽर्थः ॥

विज्ञान० व्याख्या ॥ विज्ञानं-कला तस्य पारः-प्रान्तः, तं गच्छसि इति विज्ञानपारगः, तत्सं० ॥

तः-युद्धं, तं वारयसि-निवारयसीति तवारः, के तवारकः, तत्सं० ॥

तथा वीराः-शूराः, तेषु मानः-पूजा विद्यते यस्य स वीरमानः, तत्सं०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा मुक्ता–त्यक्ता ममता–ममत्वं येन स मुक्तममतः, तत्सं० ॥

तथा[आ–] समन्तात् गमस्य–ज्ञानस्य दानं–उत्सर्गो विद्यते यस्य स आगमदानः, तत्सं० ॥

तथा ता–लक्ष्मीः, तस्याः आलिः –रलयोरैक्यत्वात्–श्रेणिः विद्यते यस्य स तालिः, तत्सं० रलयोरैक्यत्वात् ॥

तथा तमः हन्तीति तमोहः अर्थात् धर्मः, तत्र रता–आसक्ताः तेषां लोपोऽर्थात् कष्टं, स एव रोऽग्निः, तत्र सत्–शोभनं पयो–नीरं तमोहरतलोपर-सत्पयाः, तत्सं० ॥

तथा जिर्जेता, तत्सं० ॥

एवंविध हे मातङ्गयक्ष ! त्वं काममत्यर्थं सूरीशहीरविजयस्य श्रीहीरविजय-सूरेः प्रसन्नो भव, इति क्रियाकारकसम्बन्धः ॥

इति यक्षस्तुतिः ॥ ४ ॥ चतुर्थोऽर्थः ॥

इति अवचूरिः ॥

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org